कर्ण । [1]वसिष्ठ । अलुश । [2]शल । डुपद । अनडुह्य । पाञ्चजन्य । [3]स्थिरा । कुलिश । कुम्भी । जीवन्ती । [4]जित्व । [5]आण्डीवत् । कर्णादिः ।

सुतङ्गमादिभ्य इञ् प्रत्ययो भवति । सौतङ्गमिः । [6]मौनिचित्तिः ।

सुतङ्गम । [7]मुनिचित्त । विप्रचित्त । महापुत्र । श्वेत । गडिक । शुक्र । [8]विग्र । बीजवापिन् । श्वन् । अर्जुन । [9]अजिर । [10]जीव । सुतङ्गमादिः ।

प्रगदिन्नादिभ्यः ञ्यः प्रत्ययो भवति । प्रागद्यम् ।

प्रगदिन् । मगदिन् । शरदिन् । कलिव । खडिव । गडिव । [11]चूडार । मार्जार । कोविदार । प्रगद्यादिः ।

वराहादिभ्यः कक् प्रत्ययो भवति । वाराहकम् । पालाशकम् ।

वराह । पलाश । शिरीष । [12]पिनद्ध । स्थूण । विदग्ध । विजग्ध । विभग्न । बाहु । खदिर । शर्करा । वराहादिः ।

कुमुदादिभ्यः ठक् प्रत्ययो भवति । [13]कौमुदिकम् ।

कुमुद । [14]गोमथ । रथकार । दशग्राम । अश्वत्थ । शाल्मली । कुण्डल[15] । [16]मुनिस्थूल । कूट । मुचुकर्ण । कुमुदादिः ।

शिरीषशब्दोऽरीहणादिषु, [17]कुमुदादिषु, वराहादिषु [18]च पठ्यते, औत्सर्गिकोऽपि तत इष्यते, तस्य च [19]वरणादिषु दर्शनाल् लुब् भवति । [20]तथा चोक्तम्, शिरीषाणामदूरभवो ग्रामः शिरीषाः, तस्य वनं [21]शिरीषवनम् इति ॥

## जनपदे लुप् । (८१/१२९३)

देशे तन्नाम्नि [22]यश्चातुरर्थिकः प्रत्ययः [23]भवति, तस्य[24] देशविशेषे जनपदेऽभिधेये लुब् भवति । ग्रामसमुदायो जनपदः । पञ्चालानां निवासो जनपदः पञ्चालाः । [25]कुरवः । मत्स्याः । अङ्गाः । बङ्गाः । [26]मगधाः । सुह्माः । पुण्ड्राः । इह कस्मान् न [27]भवति, उदुम्बराः अस्मिन्[28] सन्ति [29]औदुम्बरो [30]जनपदः, [31]वैदिशो जनपदः इति ? तन्नाम्नि इति वर्तते । न चात्र लुबन्तं [32]तन्नामधेयं भवति ॥

## वरणादिभ्यश्च । (८२/१३०१)

वरण इत्येवमादिभ्यः उत्पन्नस्य चातुरर्थिकस्य प्रत्ययस्य लुप् भवति । अजनपदार्थ आरम्भः । वरणानामदूरभवं [33]नगरं वरणाः । शृङ्गी । शाल्मलयः । चकारोऽनुक्तसमुच्चयार्थ आकृतिगणतामस्य बोधयति । [34]कटुकबदर्या अदूरभवो ग्रामः कटुकबदरी । शिरीषाः । [35]काञ्ची ।

वरणाः । [36]पूर्वौ गोदौ । [37]आलिङ्ग्यायन । [38]पर्णी । शृङ्गी । शाल्मलयः । सदाण्वी । [39]वणिकि । वणिक । [40]जालपद । मथुरा । उज्जयिनी । गया । तक्षशिला । [41]उरशा । आकृत्या ॥

---

1. अर्कलूष ब. 2. नास्ति ब. 3. स्फिक् ब. 4. अजित्व ब, ज्ञावत् इत्यधिकम् ब. 5. आण्डीव ब. 6. मौनचित्तिः ब. 7. मुनिचित्तिः फ. 8. व्यग्र ब. ड. 9–10. नास्ति ब. ड. 11. चूनार ब. 12. विनद्ध निबद्ध मूल स्निग्ध इत्यधिकम् ब. 13. कौमुदिकः ब, गौमथिकः इत्यधिकम् ब. 14. गोमथ ब. 15. कुन्द मधुकर्ण शुचिकर्ण शिरीष इत्यधिकम् ब. 16. मुनिस्थल फ. 17–19. नास्ति फ. 20. यथा चोक्तम् क. 21. शिरीषवणम् ह.फ. 22. इति इत्यधिकम् फ. 23. भवति नास्ति ब. 24. च इत्यधिकम् फ. 25–26. नास्ति फ. 27. भवति नास्ति क. 28. देशे इत्यधिकम् ब.क.फ. 29. इति इत्यधिकम् ब. 30. देशः ब.क.फ. 31. वैतसो ब.क. 32. देशनामधेयं इ.ड. 33. ग्रामः नगरं वा क.ड. 34. कटुबदर्याः ब. 35. नास्ति ब. 36. पूर्वेण गोदौ अपरेण गोदौ ब.क.ह, पूर्वगोदौ अपरगोदौ ड. 37. आलिङ्गायन ड.फ, अवहणी इत्यधिकम् ड. 38. वर्णिक इत्यधिकम् ब.क. 39. वाणिक ब, वाणाक क. 40. जलपदा ब. 41. उरसा ब.क, उरगा फ.ह.